अ   विद्यया चाविद्यानिहन्त्रिमोक्ष इत्युक्तं तदेतद्वयमुपपादनीयं तत्राविद्या तिरोधाने निरूपयिष्यन्नविद्याश्रयवि ---
क्षिप्यसमादधाति उत्तरवादे ननु तत्सेत्यादिना सर्वज्ञः स्वेतियः खल्वविद्याश्रयो सोवसर्वज्ञो भ्रांतोवा दृष्टः सर्वज्ञस्य च   द्वयमपि विप्र
तिसिद्धमित्यर्थः ननु यद्यपि वस्तुतो भिन्ना ब्रह्मणो जवास्तथापि विद्याकल्पितभेदाः न तूत्तेषामज्ञत्वेऽपि न   त्वमितित त्राह अविद्येति
जीवविभागे सिद्धे तदाश्रिताविद्यासिद्धः सिद्धायां च तस्यां जीवविभागसिद्धिरिति रेतराश्रयत्व   नमिश्रोक्ति यनुवदति अनुपपत्तिरि
ति ननु मुक्तानां ब्रह्मणो वानुपपत्तिरस्तीति नास्माभिः परिकल्प्यते किं तर्हि तत्र भिष्टतया ननु भवा   वाद्धजीवे तु तदुभयमप्यस्तीति शंकुते नन्वि राम॰
ति। ननु कल्पकाभावो जीवेष्वपि समानः स संकल्पनायामपदोषः। अनुभूयते   एवाहजीवनामिति। ननु यद्यप्यहमज्ञ इत्यत्राविद्याकल्पिता १०

अयत्वं न केनाप्युल्लिख्यते तथाप्यहमिति प्रतीतिबलादज्ञाना वेद्याकल्पितता यान्तेति शंकते नन्वहमित्यादिना। अहंकृतेरितिच्छ
हमितिकृतिः करणं अहमाकारेण परिणामो यस्मिंस्तस्या स्येत्यर्थः॥ अयावदात्मभावित्वाच्च कल्पितत्वमित्याह सुषुप्तीति। तुरीयंमो
क्षावस्था। न चाहं ब्रह्मास्मीति वाक्ये न ब्रह्मसमानाधिकर स्योच्यते। न च कल्पितस्य वस्तुभूतेनैक्यं संभवतीति कथं कल्पि
तत्वमहंकारस्येति तत्राहाहमिति। अन्यत स्थलेषु सामानाधिकरण्यं दृश्यत इत्यर्थः॥ ननु च तावदिदं वाक्यं बाध
मात्रपरमेकोपदेशपरत्वा त्सा घानिहन्ति। इति संक्षेपशोधितत्वपदार्थस्य ब्रह्मैक्योपदेशपरं न त्वहंकारस्य कथं
तर्ह्यहमात्मस्य तत्र प्रवृत्तिस्तत्राह शा वृत्तिस्यादेवं यद्यहंकारविशिष्टाश्रितमज्ञानमिति ते मतं स्यान्नत्वेवं सुषुप्तिप्रलय
योरप्यस्तिदंडायमानमज्ञानमिति मतं न च तदाहंकारोऽस्ति विकारनिकुरस्य तदा प्रविलयात्तथा च कथं कल्पिताश्रयत्वम
ज्ञानस्येति दूषयति पूर्ववादी न प्रतीतीनेति। मंडनवाचस्पतिमिश्राभिमते परिहारं दूषयति न चेति वैषम्यमेवाह तत्र हीति। न
हि साक्षात्तानयोरन्योन्यमुसन्निरनादित्वात्ततो व्यक्तिद्वाराव कल्प्यव्यक्तीनामप्यनेकतयान्योन्यमुत्पत्तिः न हि यतो बीजाद्योऽङ्कु
रो जायते तेनैव बीजं तस्मादंकुरादुत्पिलं कुरांतरात्। न चेह तथा न हि प्रतिदिनमन्येन्ये जीवाः नाप्यविद्या तस्मादस्त्येव वैषम्यमित्यर्थः॥

चि.टी.०४ यद्यप्यनादित्वादेकत्वाच्चनान्योन्यनियम्यत्वं घटतइतिदृष्टांतमवष्टभ्य शंकतेनन्वात्ममिति॥ तर्हि यथा गुणवत्त्वद्रव्यत्वयोरेकत्रात्माधिक
११ रणं तथात्राप्येकमधिकरणं वक्तव्यं तत्किं चिन्मात्रं किंवा विद्याविशिष्टमपि विकल्प्य दूषयति तर्हियादिना। दूषणांतरं चाह ब्रह्मत्ववदिति॥ उ
क्तिसिद्धिकारमतमुद्भावयन्निरूपयेति। पूर्वोदितविभागाभावमेव प्रपंचयति तथा हंसादिना। यद्यप्युत्पन्नविद्यतया गुरोर्मायाना
स्तितथापि शिष्यस्याविद्यास्तित्वानुपपन्नविद्यत्वादविद्याविजृंभितएव गुरुः नचकल्पितस्योपदेष्टृत्वानुपपत्तिः स्वप्नेनउपपन्नेरि
तिशंकतेषस्यविद्येति। एवंवि विद्याविनिर्मितोगुरुरितिपक्षं दूषयित्वागुर्वविद्याविनिर्मितः॥ शिष्यइतिपक्षं दूषय
तियद्वागुरितित कल्पनेतिवक्तव्यं साचोत्पन्नविद्ययाध्वस्तेति शिष्यकल्पनैवनास्तिकमनुशिष्यान्
भवतुतथाप्यधिगतपर जान्ननदृष्टपक्रमुपदिशेदित्याह नचामुक्तमित्यादिना एवंगुरुशिष्यव्यवस्थानुपप
त्तिमुक्त्वाबंधमुक्तस्यव्यवस्था हकिंचेत्यादिना ननुपूर्वंविद्वैवनोत्पन्नातेनोपपन्नः संसारोपलंभः शुकादीनां
नुविद्योत्पत्तिशास्त्रंत्वर्थवादरा तितत्राह नचविद्येति किंचपूर्वंकस्यचिदपिचेद्विद्यानोत्पन्नातर्हिगुरुसंप्रदायाभावादपिवि एम०
द्यानोत्पद्यतेनिर्णयस्यै दनिर्मोक्षप्रसंगइत्याह गुरुसंप्रदायेति। तदेवमविद्याश्रयानिरूपणादविद्याधिनोजीवब्रह्मणोर्जी ११

वानांच भेदइत्य तः। पारमार्थिक एवात्मभेद इत्याह तस्मादिति। दन्योन्याभाववत्त्वेन सिद्धसाधनता परिहारायात्मप्रतियोगिके इत्युक्तं।
आत्म तद इत्यर्थः॥ भेदमात्रसत्त्वे प्यनुमानः आहात्मनिष्ठेति। अभिरक्तत्वमधिकरणत्वं सिद्धसाधनता परिहारार्थं। मिथ्याभेद
निरासे युक्तं अप्रसिद्धविशेषणता निरासार्थं आत्मनिष्ठपदं ननु एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मेति सर्वभूताना
मंतरात्मत्वमप्यस्य कीर्त्यते स च क्षेत्रज्ञ एवेति कथमस्येश्वर विषयते त्याशंक्यांतर्यामितया तत्स्थापितत्वं भवतीत्याह न च तत्रेति। नन्वेक
एव तु भूतात्मेति प्रतिभूतं भेदेन प्रतिभासमन जीवात्मनामैवैक्यप्रतिपादकास्मृतिरस्तीति तत्राहैकत्वेति नन्वीश्वरस्यैकत्वात्॥ कथं
तत्र बहुधा दृश्यते इति निर्देशोपपन्नितत्राह तस्येति। ननु तत्त्वमसीति प्रकृत महदादि मध्ये आत्मतां श्वेतकेतुपलक्षित जीवस्य प्रती
पादय जीवब्रह्मभेदो जीवभेदो वेति तत्राह तत्त्वमसीति। भिन्नेपि परमेश्वरः भेददृष्टिः कर्तव्या योषा विवग्निदृष्टिरित्यर्थः॥ कल्पितए
वृषेति यथाहितस्मात्पूषा प्रपिष्टभागो ऽदंतको हीति वाक्ये पूर्वात्पूषो देशेन पिष्टयागविधिः कल्पित एवमत्रापि प्रार्थ द्वैतोपरि
धारणादिगम्यते श्रुत्यंतरविरोधं परिहरति नेहेति॥ यद्यप्येनेभ्नीकृत समाधानेन तथापलुच्यते न केवलं भेदस्य विरोधः॥
श्रुतिसिद्धस्यात्मभेद इत्याह द्वासुपर्णेति। अत्र हि द्वाविति जीवेश्वरौ द्वित्वेन निर्दिष्टौ पैरन्यत इत्यनश्नन्नन्य इति च भोक्तृभोक्तृ

तथापरस्परमन्यत्वे नचनिर्दिष्टेनतथाऽप्यजामेकांइत्यत्र एषतेजोवन्नलक्षण द्यामेकोजहाति ऽन्यम्यजुषमाणः प्रियमाणोनुषेते
इत्यजशब्दोपात्तजीवभेदः प्रतीयते बद्धाबद्धलक्षणधर्मभेदांधे पिजीवस्यलौकिकत्वयातद्भेदः शक्यानुवादः तथापिपरमेश्वरस्या
लौकिकत्वान्नतद्भेदः संभवदनुवादइतिप्रतिपाद रिमिदंवावाक्यइत्याह नचतत्रेति। तर्हिजीवभेदप्रतिपादकत्वंउपेक्षितमस्य
तथाचात्ममात्मनिकभेदत्वाददैतसिद्धिरिति षेति। अस्यानुवादकत्वेपियत्सिद्धमिदमनुवदतितदेवतत्रप्रमाणमित्यर्थः॥
एवमनुमानागमाभ्यामात्मभेदं साधयित्वार्था हिसुखदुःखेति। ननुकस्मिंदेहे पादश्रीरःप्रदेशानिष्ठतयासुखदुःखव्यवस्था
यामपिनात्मभेदस्तत्कस्यहेतोरौपाधिकभेद तथासर्वदेहेष्वप्येकएवात्मातत्तद्देहोपाधिभेदाच्चशंतादिव्यवस्थाकिंनस्या
दतआह नचपादइतिनहियथासकलावयवेष्व नुसंधानंतथासकलक्षेत्रेष्वप्येकोनुसंदर्शितनचैतदस्तीत्यर्थः॥ अधिकरणमिदमभि
धीयतेयत्सुखादिव्यवस्थायात्मभेदइ धर्माहिसुखादयःसाक्ष्यत्वान्नचसाक्ष्याणांसाक्षिधर्मत्वंतथासतिचस्वधर्मग्राहकत्वेस्वग्रा
हकत्वयास्वहत्तिविरोधमस हनचसुखादीनामपिसाक्षीद्रष्टान्वेतिविकल्पाद्यंदूषयतितत्सद्रष्टत्वइतिनहिप्रमात्रतिरिक्तः कश्चिद्दृष्टि
संप्रति — भोद ननुद्विविधंद्रष्टृत्वंज्ञानाकारेणपरिणामपरिणतत्वंअलुप्तचिद्रूपत्वंचेतितत्रपूर्वमस्तुस्वयंऽयःपिंडस्येवसंक्रांताग्नेर्दग्धत्वं

उत्त बद्धे खिवत्तमुखो दृष्टा साक्षितेन प्रमात्रा नापि स्तुखाद्यसाधक इति तर्हि मुक्तिदशायामेवैतादृशमभिव्यज्यत इति व— हारनिर्वाह
कत्वमाहतिरिसाह ब्रह्मस्वरूपत्व इति न च प्रमात्रतिरिक्ते साक्षिणि किंचित्प्रमाणमस्तीत्याह प्रमाणेति। प्रत्यक्षपक्षे हि न तावद् ह्यद्यमत्वादं
46 तरत्वेपि नित्यसमन्वितया अनित्यत्वे मानसमवत इति तद्वेद्यं प्रमातैव नित्यं च प्रत्यक्षं न जीवीमस्तीति भावः॥ अस्तु तर्ह्यनुमानं साक्षिप्रत्यक्षे
प्रमाणमिति संकते इत्याप्रत्यक्षवेद्या इत्युक्ते मानसप्रत्यक्षमादाया यांतिरतादर्थमनित्यज्ञातिरिक्तेत्युक्तं॥ तथाचानीश्वरवादिनं प्रति सिद्धं वि
शेषणतात्पर्यमेतत्ग्राहकेत्युक्तं॥ अनेन ग्राहकानित्यप्रत्यक्षमादाय च साध्यप्रसिद्धिः। पक्षे चैतद्ग्राहकानित्यज्ञानत्वानधिकरणत्वमेतत् आह
कत्वानधिकरणत्वान्न संभवतीति तद्द्येत्वेन व्याघातात् तस्मादनित्यज्ञानत्वानित्यज्ञानत्वानधिकरणं किंचिन्नित्यप्रत्यक्षमादाय तद्ग्राह्यत्वमिच्छादीनां सि
ध्यतीति नित्यसाक्षिप्रसिद्धिरित्यर्थः॥ अत्र तार्किकः। मा हन्त ईश्वरेति। अनीश्वरवादित्वाभासस्समानयोगक्षेमतामाहानीश्वरेति॥ शङ्कते हन्ति
त्यमपि किंचिदनुमानमेवं साधयितुमित्यर्थः। विपक्षे बाधकाभावाच्च शंकितानप्रयोजकतामाहानेनेति न केवलं मस्मन्मतत्व एवैयं गतियत्स्वरूपेण
ग्राहकत्वं सुखादिविशिष्टाकारेणाग्राह्यत्वमित्यनुहितो ग्रयणं भवतोप्येवं विधे भेदाग्रयणमेवकंचिद्धरणामित्याहान्यथेति। आत्मै
क्याध्यात्तबुद्धिर्हि प्रमाताकत्वेति चोच्यत इत्यर्थः णांतरमाहाविद्येति निर्विकल्पकचैतन्यस्य सर्वज्ञत्वसर्वसाक्षित्वादिविकल्पाभा

चि॰टी॰४ भावादविद्याविशिष्टस्य स — नोग्राहकभावं दर्शयतित्याहब्रह्मस्येति। ननु तत्र तत्र भ्रमसादृश्य एव तथात्वे प्रमाणमिति
१२ नविरोधः। तस्यैवापि समान — पेति। एवं प्रत्यक्षानुमाने साक्षिणि दूषयित्वार्थापत्तिं दूषयति एतेनेति। अन्यथापीति मान
स्वे द्युत्वेपि विरोधाभाव — त्वादित्यर्थः ननु चक्षुरादिपरस्परव्यभिचारिकरणोर्जन्यानि यानि यानि ज्ञानानि तेषु जानामि जानामीत्य
नुगतः। कश्चिदनु — नावत्यनतायते स च स्फुरणैवानुसंधातुमर्हतीति इतरथा जानामीति व्यवहारानिष्पत्तेः॥ न च तत्र स्वज्ञानांतरतः
स्फुरणमनवस्था — तस्माद्युः स्वकाशः सकलस्यानुसंधाता साक्षी सोर्थापत्तिसिद्ध इति तत्राह न च व्यभिचारीति। अत्र स्फुरतानुसं
धात्र — तत्त्वसंविदाश्रयत्वे नापि संभवतीति न त्वानवस्थानस्याः स्वप्रकाशत्वादिति भावः॥ परिहरति ज्ञानामिति। तार्किकपक्षे तु स्वैकत्व
ोधपरिहारेणमारेणमानसप्रत्यक्षमादायपरिहर्तव्यं। आगमं साक्षिणि निषेधति न साक्षीति — वे तस्य चेतन इत्यर्थः तटस्थेश्वर
मादायाप्युपपत्तेरिति भावः। किंच साक्षस्य साक्षिणि निषेधति न साक्षीति धर्मत्वेन घट तदिति वक्तुमेव न शक्यते प्रपंचपादिवि — साहसिकोपी
तिसाक्षिरूपस्यात्मनो विशेषगुणधर्मवत्वेपि अनुमानमाह किंचेति द्रव्यान्य इत्युक्तं घटाद्यन्यत्वे नार्थांतरतादर्थ — व्यान्य इत्युक्तं तथापि — राम॰
कालादिगन्यत्वे नार्थांतरतादर्थो विशेषगुणवदित्युक्तं। यस्माच्च विशेषगुणवतो व्यापकद्रव्यादाकाशो — शस्य पक्षत्वे — १३

नतद्न्यत्वासंभवात्॥ घटेत्याकाशान्यत्वेन साध्यसिद्धिः फलितमाहुस्तथा चेति॥ ॥सिद्धं — माघ ते नितत्रविद्यायाजड
निष्ठत्वं तावन्न संभवत्यविद्येतरजडस्य तत्तज्जंभणतया कारणस्य कार्याश्रितत्वायोगात्। अप्रतिनि नहि सास्वप्रकाशानदाश्रयोपि
48 चेज्जडः केनैषा प्रकाश्येत तन्निष्ठत्वं च कल्प्यं पत्यकाशादेशापि प्रकाशात इतिचेतन्न निष्ठत्व — यातनत्रापिनजीवाश्रयोप्यवोक्तदोषात्। यथा
वक्ष्यतोऽनंगीकारपराहता इति। नच ब्रह्मपक्षेपि दोषसाम्यं तदसिद्धेरिति अभिप्रेत्य ब्रह्मणश्चितत्वपक्षोक्तदूषणानि परिहृतिपवद्विसादिना।
स्वरूपत इति द्वेधा हि सर्वज्ञत्वं संभवति स्वभावभूतप्रज्ञयायथातत्वकेश्वरस्य प्रमाणजनितप्रज्ञया वाप्यथा तावद्योगीनां उभयथाप्यविद्यासंबं
धमंतरेणा नोपपद्यत इत्युक्तोकार्थः॥ विवृणोति स्वरूपेत्यादिना॥ यथाचदृग्दृश्ययोराध्यासिक एव संबंधो नान्यस्तथोपपादितं प्रथमपरिच्छेदेमि
थ्यात्ववादे समाप्तत्वस्येति प्रमाणजनितज्ञानाकारपरिणामी प्रमाता नाम न च निर्विकल्पके चिन्मात्रात्मनः परिणामसंभवः नापि केवलजडबुद्ध
रन्तःप्रमायाः प्रकाश — — — रिणामः तस्माद्बुद्ध्यात्मनोरितरेतराध्यासविलसितः कश्चिदाकारः प्रमाता सचेंद्रियाधिष्ठानाद्बहिर्यात तत्करणलम
स्यच नोपपद्यते तिन्नचेतेषु ममाभिमाना हि नस्यद्दृष्टिहष्टाम्रत्वनास्ति परकरपोषदर्शनात्॥ न च सत्तस्यो विद्याध्यासमंतरेणता मानसं
भवः॥ प्रमाणप्रमेययाः संबंधस्याध्यासिकत्वमधस्तादेवोपपादितं॥ तत्प्रमाणजनितमपि सर्वज्ञत्वमविद्यावलकल्पकम र्थः॥ एवमविद्याश्र

चि॰टी॰४
१४

यत्वे सर्वज्ञत्वं अनुरूपादिनत्वविरुद्धादीत्युक्तं। स्वरूपविरोधमाशंक्य परिहरति ननु प्रकाशेत्यादिना। अवि त्वमभिप्रेयत्तानंतरं कोर्थोभिप्रेतइ
तिविकल्प्य प्रथमे सिद्धिमाह न घट इति द्वितीये त्वसिद्धिमाह द्वितीये इति॥ नाविद्या तन्यायान्यत्वादिति हीनदासाधनीयं न्यच्चैवं के
चिदपिव्याप्तिंमां प्रति संप्रति पंन्नास्तिप्रसुत विरुद्धस्वविद्धिति रिक्तस्य विद्वेकायतन प्रेरित्यर्थः। चिदेकाश्रयतां मद्धानस्य च मम
विरोधपक्षे दूषणेदूतइत्याह तरे केति। ननु यदि त्वाविद्याया विज्ञाने न विरोधः त निवर्त्तेतेत्यनिर्मोक्षो बलाश्रयवादिनां इति तत्राह नचा
विरुद्धेति। यद्यपि स्वरूपचैतन्यं न निवर्त्तकं विद्यायास्तदाश्रयत्वात्तस्य कारकत्वाच्चित्तनिवृत्तिप्रसंगाच्च तथापि वाक्यजनितवृत्त्याकारचित्तवृत्ति
फलकारूढं चैतन्यं तच्छाया वा चित्तवृत्तिरविद्या निवर्त्तिका। बुद्धङ्गोबोधो बोधोद्भावाचानुवृत्तिरविद्यानिवृत्तिहेतुरिति वृद्धा इतिभावः। विज्ञानस्य संतः कर
णपरिणामस्येत्यर्थः। नन्विष्याकार्येणांतःकरणपरिणामेन कथं कारणाविद्यानिवृत्तिरविरोधान्नहिजातु घटेन मृन्निवर्त्तमाना दृष्टचरीति। ननु लौ
किकपरीक्षकाणां बुद्धाः समंतत्वादित्याह न च कार्येणेत्यादिना नु निमित्तनिमन्त्तकत्वेपि समवायिवर्त्तकत्वं भट्टमिति तत्राहंस्वेति अथोपादानं निवर्त्तकं
त्वं न दृष्टचरमिति ब्रूयात्तं प्रत्याह कंदलीति। एवमविद्याश्रयं निरूप्यत द्विषयं निरूपयंति ननु भवत्वेवमित्यादिना ज्ञायमाने विषयेऽविद्यानसंभवतीत्युक्तं
पूर्वपक्षिणात्तदसिद्धमित्याह मान्नजानामीति। यथाचात्तज्ञानयोर्विभिन्नविषयता संभवः। तथापपादितं भावरूपज्ञानावादे किंच विद्याविद्ययोस्ताव राम॰
१४

त्समानविषयत्वं वक्तव्यं इतरथातिप्रसंगात्। नच जडविषयिणी विद्या संभवतीति विद्याविषयचैतन्यमेवाविद्याया अपि विषय इत्याह जडस्येति। एवं ब्रह्म
श्रयत्वपक्षोक्तदूषणानि परिहृत्य जीवाश्रयत्वपक्षोक्तदोषाननंगीकारेण परिहरति जीवेति। दूषणांतरमनूद्य दूषयति यच्चिद्येत्या
मनिवृत्तायामविद्यायां पवस्याभावः निवृत्तायां वाऽऽद्या द्येशाहयावदिति। द्वितीयेत्याह निवृत्तायामिति। ननु भवतु सर्वद्विधे
कल्पितत्वेनापि कल्पितत्वस्यार्थक्रियानुपपत्तितयापि परमार्थः। कापि न निरूपितः स्यात्तच्छिष्याणामपि स्वस्वपिष्यगुरुतया
उक्तदोषोपरिहार्य इति तत्राह नच गुरोरिति। शिष्याविद्याकल्पितो गुरुरिति वदतामस्माकं शिष्यशब्देन किमवच्छिन्नचैतन्यमपि बुध्यते आ
वानवच्छिन्नं वाऽऽद्ये नाधिगतः परामिसंधिरायुष्मतानद्यस्माभिरविद्याकल्पितस्य कस्यचिदवस्थेरस्याविद्याश्रय पपेयतेकल्प
हि विषयशब्दार्थः॥ अत्र मात्रमनवच्छिन्नचैतन्यं इत्यवगच्छतु भो वानवच्छिन्ने ते विशिष्टप्रसक्तिः तदेतदभिप्रेत्याह विकल्प्य दित्यादिना। अ
नुभवविरोधं शक्तेनैकस्येव परिच्छिन्नानामिति॥ यथाहि स्वप्ने दृष्टपुरुषाणां यत्तानितया ज्ञानितया शिष्यगुर्वादिभेदेन च प्र नामपि नाश
नित्वज्ञानित्वं वा किंतु यत्स्वावस्थाविच्छेदानकल्प्यं यथा उपपतितत्रिष्टैवाविद्याता निवृत्तेक विद्याच एवमिहापि सकलकल्प-क्षिभूतचैतन्यस्याविद्य
ये च तथाविधकल्पनोपपत्ते नायं व्यवहारो व्यवस्थेदेष्विद्याकल्पक इति परिहरति मैवमिति॥ एतेन स्वात्मानमेव कल्पितभेदं गुरुः शास्तीत्येतदपि समर्थि

तं गुरुशब्देनावच्छिन्नत्वाभिलापादित्याह एतेनेति यत्तु नष्टपगुप दिशात्वामन्तु नैषवमुक्तस्त्वमीसुदिशो दिसुक्तं तत्राहाविद्यानिर्मितेति
।शास्त्रप्रामाण्यादेवेति। अत्र वामदेवादिमुक्तिप्रतीतेः स्तावन्ना च प्रत्द्रवमुक्तामुक्तकल्पनायाः संभवात् न च तत्तच्छास्त्रप्रतिपादि
तत्तयास्वप्नवैलक्षण्यमिति मंतव्यं तच्छास्त्राणामतत्परत्वात् न च नवधिकरणं न्यायः अद्वितीयात्संगच्छे तन्यब्रह्मरूपविद्यासंबं
धप्रतिपादकश्रुतितउद्भवमुक्तिजातावितरेतन्यायानवतारात् अखिलक वृत्तिस्त्वचैतन्ये शास्त्रप्रामाण्यादेव भविष्यतीति न च तद
प्यतत्परं मुक्तौ तत्स्यैर्लिंगावगमात् भव प्यचसर्वमुक्तिवादिनामितः एवं मसंजातापि मुक्तिः सर्वजीवानां शास्त्रप्रामाण्यादे
वभविष्यतीत्यध्यवसीयते॥ अथानुमानादत्राध्यवसायः तत्तदत्रापितुल्यं शक्यते हि योयत्साधनमनुतिष्ठति सतत्फलं प्राप्नोतीति
व्याप्तिं गुहीतुं विशेष इतिभावः॥ यत्त्वात्मनोभेदप्रमाणमुक्तमात्मात्मप्रतियोगिकान्योन्याभाववानितितत्रकिंपारमार्थिकतद्वत्त्वंसा
ध्यतेव्यावहारिकं वाउभयथापिदूषणमाह अप्रयप्रयोगइत्यादिनाद्वितीयानुमाने दूषणमाहद्वितीयेति॥ अत्रतावदात्मनांपरस्परं
भेदोनसिध्यति आत्मनिसत्त्वभेदमात्रसाधनस्यच दृष्टप्रतियोगिकतयाप्युपपत्तेः तदप्यस्त्वितिवदतोभेदखंडनोक्तदोषाअवगन्तनीयाः। एम॰
भवतुवात्मनोभेदपरत्वात्तथापिकालात्ययादेशइत्यर्थः। सत्वमितिपक्षत्वंचास्माभिः॥ मिथ्यात्वपादेउपपादितं॥ ईश्वरस्त्वसंगमेवाह १५

नहि ईश्वरे स्येति। किंच सर्वेषु भूतांतरात्मत्वव्यपदेशादपि प्रत्यगात्मन एवायं एकत्वव्यपदेशः न तटस्थेश्वरस्य यात्वतया तटस्थेश्वरपक्षेप्य
न्यथासिद्धिरुक्तानामनुद्याप्नितचेष्टे न वृत्तस्या प्रीति। नचवाच्यमित्युन्नयः॥ नकेवलं भूसंतरे ऽनर्योमिब्राह्मणएवात्मभेदो निराकृत इत्या
हक्षेतर्यामीति। ननु तर्हि य आत्मा न तिष्ठन्चित्सात्मेश्वरयोराधाराधेयभावस्यकागतिरितितत्राह यच्छात्मनीतियथाहिघटाकाशेमहाका
शोवर्त्तत इति व्यपदिश्यते तेन स्वरूपतयातत्रानुगतत्वादतएवचमहाकाशाधीनो घटाकाश इति व्यवहारस्तद्वत्तत्रापि पाधिकजीवात्म
52 नः स्वरूपत्वात्परमात्मा तत्र तिष्ठन्नितियत्तन्नियम्यतीति परमेश्वराधीनता प्रतिपादनार्थोयं व्यपदेश इत्यर्थः किंचत्वत्पक्षेपि नमु
ख्यार्थः संभवति अद्वयद्वयोः परापरात्मनोः परस्पराधाराधेयतायानुपपत्तेः व्यापकत्वाच्च नकुंडबदरन्यायः तस्मादनिगच्छतापि
नैरर्थक्यपरिहारायोक्तरवार्थः स्वीकर्त्तव्यः इत्याह — येतिम्भूसंतरस्योक्तान्यथासिद्धिपरिहरति नचतत्त्वमसीतियदिहिजीवब्रह्म
णोर्भेदः प्रमाणांतरगोचरः तर्ह्येव तद्धि प्रमाणैरैक्यो विरुध्येत ननु तदस्तीत्याह जीवब्रह्मणोरिति ननु परमेश्वरविरु
द्धधर्मवत्त्वेयात्तावत्कर्त्तामोक्ताऽदुःख्यहमितिभेदप्रतीतरस्ती त्यद्धिरुद्धोयमागमइतितत्राह द्विवेति अपच्छेवापदि जीवब्र
ह्मभेदः प्रमाणांतरागोचरः कथंतर्हि सप्रतिभासत इत तत्राह नवास्तवभेदसाधिकेयंमितिरप्यंतासर्वोवगमोपायाभावादि

ब्र॰टी॰४
१६

द्वितीयपक्षे सिद्धिं दर्शयन्नुपक्रमोपसंहाराभ्यासापूर्वताफल दोपपत्तिरूपषड्विधतात्पर्यलिंगानि दर्शयति इत्यत्रैव अतउ
क्तादैक्यज्ञानात् व्यतिरेकेणान्य उपासनो भिन्नः अहं च तस्माद्भिन्नः संसारीति भेदेन परमेश्वरं विदुः तन्न राजानः संतस्त
द्धीनतयाखाराज्याभावात् क्षयिष्णुलोका भवंति अपुनरावृत्तिलक्षणमुक्तिं न प्रतिपद्यंते मृत्युरूपं च संसारं प्रतिपद्यंत इति भेददर्शिनां दोष
वर्णनादिसमर्थः॥ एवं छांदोग्यश्रुतौ लिंगादि दर्शयित्वा बृहदारण्यकेपि दर्शयति अन्यत्रापीति इतो ह्युपासनापरत्वमस्य नास्ती
त्याह तद्धास्येत्यादिना नत्नूपासनापि विद्यैवातः सापि किमित्यविद्यानिवृत्तिका न भवेत् तत्राह उपासनेति न ह्युपासनाविधिविषयता
त्विकतामपेक्षिते योषिदज्ञादावदर्शनात् क्रियैव चैषोपासनाविधेयत्वाभप्रमितिः न हि प्रमितिः पुरुषाधीनात्मलाभा वस्तुधी
नत्वात् तस्मादुपासनाया अविद्यानिवर्त्तके सामर्थ्यः इतो ह्युपासनापरत्वमयुक्तमित्याह परमार्थेः — इति किं भिन्नस्यैव सतो जीवस
ब्रह्मरूपैक्यमुपासनयोत्साद्यते भिन्नस्य वानाद्यः अभेदस्य पूर्वमेव सिद्धत्वात् भेदस्य च तत्तत्र्यांतिमात्र निंद्यैकमिवत्सेवा
तद्द्वितीये तु स्थित एव जीवे ब्रह्मैक्यं न प्रेवा नोवा नो मयथापि एवात्र विरुद्धत्वात् अपरोक्षस्वरूपनाशेनापुरुषार्थत्वादिति भावः राम॰
इतो ह्युपासनापरत्वं न घटते यद्द्वितीयोदयसमसमयमेवमोक्षः श्रूयते श्रुतिषूपासनापरत्वे च पूर्वव्यवधानात्तदनुपपत्तेरित्याहद्वे १६

द्भवतीत्यादिना नेह नानास्ति किंचनेत्यस्यापि समस्तद्वैतनिषेधपरतामुपपादयति नेत्यादिना व्याख्यातश्रुत्यायं मिथ्यात्ववादे ग्रंथः भवतु ब्रह्मणी
नानाभूतवस्तुनिषेधस्तथापि कथं मिथ्यात्वसिद्धिः यावतान्यत्रापि सत्त्वं संभाव्य नेह निषिद्धघटवदिति तत्राह कारणादन्यत्रेति यत्तु भेददर्शननि
दाभेदोपासनाविधिपरा न तु तत्परे सुक्तं तत्राहोपासनेति यास्त्वात्मभेदे श्रुतयः पूर्वपक्षिणोदाहृतास्तासां कल्पितभेदविषयतयाप्यन्यथासिद्धिमाह द्वासु
पर्णौ सादेश्चेति न तु लोकोपि प्रसक्ताद्युम्नतमो निर्धारितविशेष इति तत्सिद्धत्वेपि प्रामाणिकत्वमेवापततीत्युक्तं तदसत् देहात्मभावादौ व्यभिचारात् इ
त्याह लोकसिद्धत्वेपीति मानुसुखादिव्यवस्थान्यथानुपपत्तिरुक्तानां परिहरति व्यवस्थेति दुर्निरूपतामेव दर्शयति व्यवस्थाशङ्केनेति तत्र किंभि
न्नधर्माणां युगपदेकत्रावस्थानानुपपत्तिरधिकरणभेदसाधिका उत भिन्नाधिकरणभिन्नधर्माणां उक्तविधानुपपत्तिः उत विरुद्धभिन्नधर्मा
णां उक्तविधानानुपपत्तिरिति तत्राद्यं दूषयित्वा द्वितीयं दूषयति भिन्नाधिकरणे नेति तृतीये प्राह परस्परेति को यं विरोधः सुखादीनां किं सहानवस्था
नं किं वा वध्यघातकभावः उत भावाभावरूपत्वं आद्ये प्राह सहानवस्थानेति ननु कथमणुपरिमाणस्य मनसः शिरःपादात्मप्रदेशाभ्यां युगपत्संबंधः
येन तत्प्रदेशवर्त्तिसुखदुःखयोर्युगपदुत्पत्तिः स्यात् तत्प्रगतोसमवायिकारणक्रमेणोत्पन्नत्वात् सुखदुःखयोर्भ्रान्तिरेव यौगपद्यप्रमीतिरिति तत्राहाणुप
रिमाणस्येति त्वगिंद्रियं हि सकलशरीरव्यापकत्वात् युगपच्छीतोष्णाभ्यां संनिकृष्यते तच्चैकेन मनसाधिष्ठीयते ततश्चोभयविषयज्ञानोत्पत्तौ युगप

त्सुखदुःखयोरुत्पादेन विरुध्यते त्वग्द्वारात्तु युगपत्संन्निकर्षाधिष्ठानात् उभयविषयमेकं ज्ञानं सामग्रीसंपत्त्या समुत्पद्यत इत्यर्थः ननु भवतु युगप
त्ज्ञानं तथापि नैकत्र तयोरवस्थानं न हि यावदात्मं सुखदुःखोत्पत्तिरनुपलंभात् किंतर्हि येन शरीरप्रदेशेन कंटकसंयोगः समजनि तत्र दुःखं भि
न्नात्मप्रदेशमनःसंयोगात्तत्रैव सुखादय उत्पद्यंते तेन तत्रस्थसुखदुःखयोर्भिन्नप्रदेशावस्थितत्वादस्त्वेव सहानवस्थानमिति तत्राह तत्प्र
देशेति अथवा समवायिनः संयोगक्रमात्सुखदुःखयोः क्रमोत्पादः किंन्न स्यादिति तत्र तत्प्रदेशेति। त्र्याविति पादादिव्यापितया नोपलभ्यतेत्य
र्थः॥ दूषणांतरं चाह सकलेति मनःसंयुक्तप्रदेशस्याणुपरिमाणतया तत्रस्थसुखदुःखस्य निखिलशरीरव्यापितानोपलभ्यतेत्यर्थः अलं वा विवादेन
विनश्यद्विनश्यतोर्भवतैव सहावस्थानमंगीक्रियत इत्याह विनश्यदिति द्वितीयं पक्षं प्रक्षिपति वध्यघातकेति ननु त्वस्त्वेवं युक्तिपरिनिष्टंभः पुंयाऽ
नुभवस्य तु का गतिः न ह्येकस्मिन् सुखिनि सर्वे सुखिनो दुःखिनि वा दुःखिन उपलभ्यंत इति तत्राह व्यवस्थायाश्चेति अंगीकृतसहानवस्थानंका
ल्पनिकभेदमादाय परिहारः एतेन भावाभावविरोधोऽपि प्रतिक्षिप्तः एकस्मिन्नप्यात्मनि सुखस्य तदभावस्य च भवद्भिरेवांगीकारेणाव्यवस्था
पकत्वात् न च भावाभावत्वमपि शंकामधिरोहति उभयोरपि गुणत्वेनांगीकारात् यत्तु पादाद्यवयवेष्विव निखिलशरीरेष्वेकस्यैवानुसंधानं स्या एम॰ १७
दिति तत्राहानुसंधानस्येति नन्वतीतत्वमेव तत्रोपाधिः ननु शरीरभेद इतरथा वर्तमानानेकशरीराधिष्ठातृयोगव्याप्तस्य नेष्टानुसंधानप्रसं

गादितित्राहवर्त्तमानेतिमीमांसकानांतावदयंयुक्तःप्रसंगइत्यर्थःतार्किका महयोगीतिननुयद्यपिचक्षुरवच्छिन्नस्यश्रोत्राद्यनुसंधानंनास्ति
तथाप्यस्त्येवैतदुपलक्षितोनुसंधाताइतरथाअहमेवाहंरूपमद्राक्षंसएवशृणोमीतिप्रतिसंधानाभावप्रसंगादितितत्राहोपलक्षितस्येतिपरमा
त्मानुसंधातेत्यर्थः ननुकथंदोषाभावः यावतामरणतत्तत्स्यकंटकोद्धरणायपाणितलव्यापारप्रसंगस्यदोषत्वादितितत्राहानुसंधाने
पीन्द्रियप्राहिभवतांसर्वज्ञेश्वरस्ययोगिनोवासर्वत्रानुसंधानेप्यप्रवृत्तिः तत्कस्यहेतोरभोक्तृत्वादेवमस्मन्मतेपीत्यर्थः यच्चसाक्ष्यतयासुखा
देःसाक्षिधर्मत्वाद्यभावाद्यधिकरणतयाव्यवस्थापकत्वंपूर्वपक्षिणाशंक्यदूषितंतदपिसमर्थयतेसुखादीनांचेतियत्तुसाक्षिणोपिद्रष्टृत्वप्र
मातृत्वंतन्नभवतःइतरथाव्यवहारानंगत्वमितिसुक्तं॥तत्रइष्टत्वेपिप्रमातृत्वंतन्नभावंपरिहरतिसाक्षिणश्चेतिप्रमाणोर्थःप्रमिणोतीतिप्रः॥प्रमातान्नामनचेवम
साविसयर्थः॥ननुतर्हिजाग्रदादौज्ञानादिसाधनकर्तृत्वंतस्यास्तुपरतन्त्रप्रमाणःव्यापारत्वात्तदानीमतोव्यवहारानंगत्वंतदवस्थमितितत्राहतस्य
चेतित्वंतत्स्वभावस्वरूपत्वेनेत्यर्थः॥साक्षिणोतार्किकंप्रत्यनुमानमाहचैतन्येतितदध्यक्षेणचैतन्यप्रत्यक्षेणेत्यर्थः इदंचविशेषणंपूर्वोक्तेश्वरस्यसाक्ष्यर्थांत
रतापरिहारार्थंनहीश्वरस्यप्रत्यक्षंचैतन्यप्रत्यक्षमितिभवतामंगीकारः श्लोकेविहरणेविवादेति।अत्राप्यनित्यज्ञानातिरिक्तेव्यनित्यज्ञानत्वानधिकरण
मित्यर्थः ईश्वरप्रत्यक्षतयार्थांतरतानिवृत्त्यै एतत्प्रत्यक्षपदंमानसप्रत्यक्षतयासिद्धसाधनतानिवृत्त्यै अनित्यज्ञानातिरिक्तेत्युक्तंअनित्यज्ञा

चि॰टी॰४ नातिरिक्तश्चैत्तप्रसक्षस्याप्रसिद्धत्वात्प्रतिसिद्धविशेषणतानिरूपणमेतत् द्याहकेतिपदेन यावेच्छादिग्राहकनिसा परोक्षसाक्षिसिद्धिः परेच्छादिष्वेतत्
१८ प्रसक्षाविषयेषु व्यभिचारनिवृत्त्यै हेतावेतत्पदं अन्तीद्रियेष्वव्यभिचाराय प्रसक्षपदं यत्तु निसानुमानस्यापि साधकतया भासमसमन्वययोगक्षेमत्वमु
क्तं तत्राह नचाभासेति जन्यगर्भमनुमानलक्षणमित्यत्र कृते थिकसाधर्म्यं संमतिमाहव्याप्यदिसादिना नच निसप्रसक्षाभ्युपगमेपि प्रसक्ष
लक्षणाव्याप्तिः साक्षात्कारिज्ञानत्वस्य तल्लक्षणत्वादीश्वरप्रसक्षस्य तार्किकैरंगीकारान्मोक्षदशायां भावेऽपि विनाशिनो परोक्षस्य खज्ञानस्यांगी
कारात् तन्मतेपि साक्षात्कारिज्ञानत्वस्यैव लक्षणत्वात् ~~ईश्वरप्रसक्षस्य तार्किकैरंगीकारान्मोक्षदशायां भा~~ तत्र यथाह नाप्यः साक्षात्प्रतीतिः प्रसक्ष
मिति स्यानुमानस्य च विपक्षे बाधकतर्कमाह मानस्य प्रसक्षे तिब्रत उक्तसमाधानं दूषयति नच स्वरूपेणेतिनायमविरोध नियामकः एतस्मिन्विद्यमाने
पि कर्तृकर्मत्वयोरेकत्र देवदत्तादौ विरोधदर्शनादिसर्थः यत्तु कर्तृकल्पकरणत्वयोरपि तु द्वौ विरोधस्तत्रापि समानः इसुक्तं तदसत् लोके तयोर्बहुलम
विरोधदर्शनादिसाह दृष्टपते चेति अन्यत्र लौकिके इसर्थः॥ अत्राहितटापुरुषेकर्त्रोः अयं च करणता तायुद्धे निर्दिष्टं पत इसर्थः यात्वविद्यायाः कर्तृत्व
कर्मत्वप्रतिबंदी गृहीतानां परिहरति नचाविद्येति नाविद्याविशिष्टस्य साक्षित्वेनाप्युपलक्षितस्य किं तु न उपाधिकस्य अयं कोऽयं विशेषणोपलक्ष राम॰
णोपाधिनां भेदः स्मृ एककार्यान्वयित्वेन भेदकं पदविशेषणं॥ नैत्यमिवोसत्वस्य अननुयायित्वेन तु भेदकानामुपाधिनां लक्षणतापि सिद्धांतयोरपि १८

यावत्कार्यमवस्थायिभेदहेतोरुपाधिनाकाशादिचित्कृतयाभेदधीहेतुरूपलक्षणांतेननाविद्यायाःकर्तृत्वभोक्तृत्वसर्वेःयद्वैतादितिइयंहिसाक्षीद्वैताभावनि
बंधनंद्रष्टुर्दर्शनंस्वरूपतस्त्वदर्शनंवदंतीश्रुतिःस्वभाविकमेवस्फुरत्वावभासकचैतन्यंतत्तद्विषयानुषंगवशाच्चतत्तद्विषयानुविकल्पइतिदर्शयतीत्यर्थः॥
यातुतदात्मानमेवावेदितब्रह्मणिकर्तृत्वकर्मत्वप्रतिबंदीगृहीतातांपरिहरतिब्रह्मत्ववेत्तिनतुतथापिकर्मकर्तृत्वाभावेकिमायातं॥यावताएकस्यैववेद्यत्ववे
द्यत्ववेदित्वांगीकारादितितत्राहतथाचेतितथाचेतिनतुएवंघटकुटीप्रमातापितंत्रांतःकरणविशिष्टस्यप्रमातृत्वंस्वरूपेणाचकर्तृत्वमितिवदताए
कस्यैवकर्मकर्तृत्वमौपाधिकस्यविरोधपरिहारइत्संगीकारादितिनतुभयस्याप्यसिद्धेःनतावदंतःकरणविशिष्टतयास्यकर्तृत्वमारोपादंतःकरण
गतंहिकर्तृत्वंधर्म्यध्यासद्वाराचैतन्येपरमारोप्यतेनस्वयंदंडदेवदत्तयोरिवविशेषणविशेष्यभावःतस्मादारोपितत्वान्नकर्तृत्वंनाप्यकर्मत्वंतच्छन्याधि
ष्ठायभाक्त्वाभावात्अस्तुवाकर्मत्वंहृत्तिव्याप्यतामात्रेणतथापिकर्तृत्वाभावादेववैषम्यमितिअनुसंधानान्यथानुपपत्तिमपिसाक्षिणिप्रमाणंसम
र्थयतेनचनिःसेतिनिराकृतत्वात्स्वप्रकाशवादइतिशेषःआगममपिसमर्थयतेनचसाक्षीतिकिमितिनयुक्तंतत्राहमायाविशिष्टेतिनहिनि
र्विकारचैतन्यस्यमायावेशमंतरेणविषयाद्याकारवृत्तिःसंभवतीतिभावःतदेवंनसाक्ष्यस्यसुखादेःसाक्षिधर्मत्वमित्युक्तेपतनुपंचपादीवचनमुदाहृतं
तत्परिहरतिनचानंदादीनामितियच्चाकाशोपक्षीह्लस्यविशेषगुणावद्व्यापद्रव्यान्यत्वसाधनेनात्मनोभेदसाधनंतत्परिहरतिविशेषगुणेतिय

स्वेदांतिनो वियदधिकरणन्यायेनाकाशोऽप्युत्पद्यते प्रलीयते चेति मन्यंते तन्मते कल्पांतरीयाद्विशेषगुणवद्व्यापकद्रव्यादाकाशादन्यत्वमादायाप्यर्थांतर
मित्यर्थः इत्वरादन्यत्वमादायाप्यर्थांतरतामाहार्थांतरं चेति नन्वनित्यविशेषगुणवद्व्यापकद्रव्यादन्यत्वं सिसाधयिषितं न चेत्वरत्वस्येति तत्राह
नित्येति पूर्वोक्तेति आकाशेनार्थांतरतेत्यर्थः साक्ष्याणां साक्षिधर्मत्वाभावप्रतिपादनमुपसंहरति तथा चेति समर्थितमेकजीववादमुपसंहरति
तदेवमिति अत्राविद्याशब्देन तदधीनो जीव उपलक्ष्यते एकजीवपक्ष इत्यर्थः नानाविद्यापक्षेपीति नानाजीवपक्ष इत्यर्थः एवं द्विविधमेकावि
द्या किंवा नाना नेत्युत्तरग्रंथसामंजस्यं॥ ॥एवं ब्रह्मस्वभावाविद्यासंबंधाद्यनुरोधेन विषदमतीन्प्रत्येकजीवपक्षः समर्थितः येतु मंदमतयो निवि
डद्वैतवासनास्कंदनजडतमसुखसोयः बद्धमुक्तादिव्यवस्थास्थेमनि निबद्धा नानाजीवपक्षमेव रोचयंते तान्प्रति नानाजीवपक्षमप्याक्षेपसमाधाना
भ्यामभ्युपेयमानः श्लाघनीयः प्रज्ञो मातापितृमान्द्वितीये त्वेकाविद्ययापि तत्सिद्धिः अध्यकल्प्यगुर्वादीनामनेकत्वात्कल्पकाऽविद्याया अपि ना
नात्वं तथैकस्याप्यनेकघटपटादिमतो सर्वेऽनंतविद्याः परिकल्प्येरन् न चापीति वाच्यं तथाप्येकजीवगताविद्याभिस्तत्सिद्धेः अनेकजीवकल्पना
वैयर्थ्यादित्याह मैवं व्यवस्थाया इत्यादिना अद्वैतवादेन क्रियेते अज्ञाः प्रतीयंते तद्देहस्याप्याविद्यकत्वात्सकलकल्पनाकल्पकाविद्यानामैक्ये चैतन्य
गतानामेव कल्पना स्यादित्यर्थः किंच नाविद्यावत्त्वया व्यवहारमात्रात्तत्ताविद्याक्लृप्तिः नापि दृश्यभेदादिविद्याभेदः स्वप्नेव्यभिचारादित्याह किंचेति किंचाने

कृजीवकल्पनायामपि गुरुशिष्यव्यवस्थानुपपत्तिः समानेत्याहापि चेति किं चानेकजीववादिनापि त्वयात्मव्यतिरिक्तजीवतद्ज्ञानानादित्वमिति मास
स्ते पारमार्थिको नेष्यते तथा च त्वदविद्याविनिर्मितत्वं वक्तव्यं त्वदृश्यत्वात्तत्राप्यप्रकाशात्मकत्वात् कल्पकत्वमेव त्वदविद्याया वक्तव्यं तथा चान्यमोहा
दित्वहानिः स्वमोहादित्वसिद्धिश्चेत्याह किं चैकस्येत्यादिना नन्वन्यमोहेनापि कल्प्यत्वादन्यमोहजन्यत्वमप्यस्त्विति तत्राह न चान्येति कल्प्यत्वा
60 त्वन्मोहेनेति शेषः इतरथानवस्थानात् किं च त्वन्मोहकल्पितस्य मोहान्तरस्य स्वात्मन्येवान्यकल्पितत्वमपि नास्तीत्याह न च त्वत्कल्पितस्येति दू
षणान्तरमाह मोहान्तरेत्यादिना विमता निर्मोहतत्कार्याणि देवदत्तीयानि दृश्यत्वात्संप्रतिपन्नवदित्यर्थः अन्यान्यदृश्यत्वाद्वैपरीत्यमपि शक्या
नुमानेन हेतुदृष्टान्तयोरसिद्धिरित्याह अन्यमोहेत्यादिना स्वपक्षे च दृष्टान्तसिद्धिमाह स्वमोहेति ननु मायाविप्रदर्शितप्रासादादिनगरादेर्मोह
कल्पितस्यापि बहुदृश्यत्ववत्तत्राप्यन्यमोहादेरन्यदृश्यत्वं किं न स्यात्तत्राह न चेन्द्रजालेति तत्रापि प्रतिपुरुषं भिन्नमेव दृश्यमित्यर्थः।
तर्हि संवादः किंनिबन्धनस्तत्राह तदेवेति अन्यथा केन बलेन प्रत्यभिज्ञा बाध्यत इति अन्यत्र मोहकल्पितस्यासाधारण्यप्रदर्शितादित्याहैकदेतीति
एकमोहकल्पितस्य सिद्धिवदिति न समर्थ्यते दूषणान्तरं चाहैकस्यैवेति स्यादेतत्स्वमोहेन नष्टः तं प्रति प्रपञ्चो नष्ट एव इतरं प्रति चानष्ट इत्यत्र न च विरो
धत्तो हठीयोऽपि कल्पितस्याचित्स्वभावित्वात्तत्राह न चैकमेवेति ननु बहुदृष्टिं चन्द्रादावस्तीव भाव इति नेत्याह द्विचन्द्रेति अनेकजीवदृष्ट

चि·टी·४ णामुपसंहरतितस्मादिति॥ ॥समाधातुमुपक्रमते नेतिननु तर्हि कार्यगौरवमुक्तं तत्राह सतीति चेति तर्ह्येकस्याप्यनेकाविद्याः कल्पेरन्नतत्का
२० र्यभ्रमाणां विभिन्नत्वादित्यभिसंधायैकस्यापीत्येकजीवेभिरप्ययमर्थो योगीरूत इत्याहेष्टसिद्धाविति पूर्वपक्षाशयमनूद्य दूषयति न
न्विसादिनान चियमपि व्यवस्था एकाविद्यया शक्य संपादेत्याशंक्य स्वप्नजाग्रत्त्वेति विभागापरिहरति नलिंगस्वप्नेत्यादिना ननु नि
वर्तितानामस्वाप्नव्यवहार निवर्तक प्रबोधेन जाग्रद्व्यवहारोपि किं न्नच्छिन्नमिति तत्राह तिविनैवेति यद्यपि जागरावस्थायां
तद्विरोधिबाधकोदयेपि तस्य न निवृत्तिः तथापि तत्त्वज्ञानादज्ञाननिवृत्तौऽस्त्विति दृष्टांतांतरमिति दिष्टाकृतेन ननु तत्त्वेति नैवेति जाग्रद्बो
धेनेत्यर्थः तस्यैव विवरणं प्रबोधेपीति विमतं तत्त्वाज्ञाननिवर्त्यं तत्त्वावभासविरोधित्वात्संप्रतिपन्नवदिति तर्ह्यनुमानं तच्चेदमनै
कांतिकं जाग्रत्प्रपंच इत्यर्थः। अर्थापत्तिपक्षं दूषयति न द्वितीय इति तत्त्वावभासविरोधित्वं हि तत्त्वज्ञाननिवर्त्यत्वकल्पकं एतच्चा
निवर्त्यत्वेप्युपपन्नं जागरप्रपंचवदित्यर्थः स्वप्नाविद्याकल्पितत्वविवक्षितं संभाव्य स्वप्नजागरकल्पकाविद्यावदिति विवक्षितं संभावनापक्षं
दूषयति न तृतीय इति वैपरीत्येपि दृष्टांतोऽस्तीत्यर्थः न वयं युक्तिबलात्कल्पयामः येन नैते दोषाः प्राप्नुयुः किं तु तरति शोकमात्मविदित्यादि राम·
श्रुतिबलात्तत्त्वज्ञानमज्ञाननिवर्तकमिति अवगच्छाम इति शंकिते परिहरति अत्रेति स्वप्नप्राधान्यान्मायाबाहुल्ये पुनः शब्दप्रयोगस्य यः २०

शशृङ्गमनिर्वृत्तिस्तु प्रतीयत इत्यर्थः तदेवं स्वप्नकारणाविद्याव्यतिरिक्ताविद्याकल्प्यत्वं जागरस्येति द्वितीयः पक्षः परिशेषितः तत्र
मित्यस्मिन्न स्वसाम्यमाह द्वितीयोऽलतीति उत्तरं चोद्यपरिहारैर्विशदैने ननु स्वप्नजागरयोः कल्पितत्वाविशेषेऽप्यवान्तरवैलक्षण्याद्द्विधा
परिकल्पितिशंकइत्वात्रापि साम्यं श्लोकेनाह विद्येतितर्हीति च श्लोकस्योपस्कारः सतिकल्पकद्वित्वे तद्द्विवरणमेवं केनोत्तरार्द्धं
विवृणोति ममापीति कृतसमाधानमप्याक्षेपं त्वनूद्य भंग्यंतरेण समादधाति न चाद्वैतेत्यादिना जाग्रत्त्वप्रतीतिर्यत्तावेदक
मानागम्यं तदेकाविद्याकल्पितमिति नास्ति नेव्याप्तिर्जाग्रत्स्वप्नयोर्व्यभिचारादित्यर्थः व्यावहारिकप्रमाणागम्यत्वमसिद्धमित्या
हन चाग्रम इति । एतेनेति व्यावहारिकप्रमाणागम्यत्वेनेत्यर्थः दूषणांतरमप्यनूद्य साम्येन परिहरति यच्चेति यावदधिकारमिति आ
धिकारिकाणामधिकारनिबर्तकानां सहस्राक्षसहस्ररश्मिव्यासवसिष्ठप्रभृतीनां यावदधिकारमेवावस्थितिरित्यधिकारे
नुपरिसमाप्ते इहैव कैवल्यं प्राप्नुवंतीतेषां जीवन्मुक्तिसाधनत्वाद्ब्रह्मविद्यायाः पाक्षिकफलत्वं निरस्य फलस्य पृथक्षणाभोगेनेति इतरेषामार
ब्धफले पुण्यपापे भोगेन क्षपयित्वा संपद्यते विदेहकैवल्यं प्राप्नोतीत्यर्थः यथा दिवप्रतिबुद्धतत्त्वस्य द्वैतभानमेवं नस्यात्तदाविद्यालेशस्यै
कारोपि दृष्टैकजीववादिनामित्याह विद्येति एवं पक्षाशयं दूषयति न चाविद्यांतराणामिति एवं वदतो व्यवस्थैवः स्यादत्याह दिमानामप्यस्य

चि॰टी॰४ मोहादिसाधनमप्यस्तु मोहादित्वस्यैवं शक्यसाधनत्वादित्यर्थः । पर्यनुयोगसाम्यमेव दर्शयति स्वप्नेति शक्यते हि वक्तुं जागरेऽपि स्वप्नत्वं दृष्टत्वा
२१ त्स्वप्नवदिति अथापि यथामयोरसंकरः तद्वदत्रापीत्यर्थः यच्चान्यदृष्टत्वेन वा धर्मेण उक्तं तदप्यनूद्य दूषयति चैतन्येति अतिदेशमेव विवृणो
ति एकपुरुषेति ननु तथापि तयोरेकदृष्टत्वादेकपुरुषसंबंधित्वं अस्त्येव तद्द्वयोर्मायाविद्ययोस्तत्कार्याणामपि स्यादित्यत्राह । स्वामि
रूपीति एकसंबंधित्वमस्माकमपि सिद्धमित्यर्थः ॥ यत्विंद्रजालादावप्यसाधारणमुक्तं तत्परिहरति इंद्रेति एष वैके न्यायमेवाह
~~स्वामिरूपीति एकसंबंधित्वमस्माकमपि~~ परेतियत्विंद्रजालादेरसाधारणत्वं दृष्टांत उक्तस्तमपि दूषयति एतेनेति कल्पितस्यैवमप
चेत्स्यानेकसाधारणत्वगमकत्वमुत्साद्याह यत्त इत्यादिना ननु एते अस्वः कथं साधारणं प्रतीयते इति तत्राह जीवाविद्येति यदि हि क
ल्पितसाधारण्यं न स्यात्तदा तत्तदसाधारणाभिर्जैवीभिरविद्याभिः परिकल्पितत्वं स्यात् तथा च सकलनियंतृसाधारणपरमेश्व
रकर्तृत्वं न भवेत् तथा च तन्मूलिपादकश्रुत्यादिविरोधः पक्षस्तत्र कारभाष्यकाराभ्यां जीवकर्तृत्वनिरासप्रमासंकृतः सोऽपि व्य
र्थ इत्यर्थः दूषणांतरं चाह जीवाविद्येत्यनुबद्धमोहकल्पितत्वे सर्वस्यैकमुक्तौ सर्वमुक्तिदोष उक्तस्तमनंगीकारेण परिहरति एकस्ये राम॰
ति ब्रह्माश्रितसकलसाधारणैकमायाविजृंभितः प्रपंचस्याभिमानः ननु प्रपंचस्य जीवविद्याविजृंभितत्वे जीवगतत्वलक्षणाद निव २१

नेरनिर्मोक्षापत्तइतितत्राह स्वीयस्वीयेति अस्मात्कारणात् पंचनिवृत्तस्यैवमोक्षः स्वस्वाविद्येति निर्देशमाक्षिप्य समादधाति ननु स्वस्वेत्यादिना अ
हमज्ञइति प्रतीतिः ननु ब्रह्माज्ञमिति रतिभावः ननु चिन्मात्रसंबंध्यविद्यायाः कथं जपक्षपादिति त्वं न ब्रह्मपक्षपातित्वं इति शंक्यं वकुं संबंधाविशे
षणादितितत्राह दृष्टं हीति द्वेधा हि संप्रदायः अविद्याप्रतिबिंबितचैतन्यं जीव इति वा अविद्यावच्छिन्नमिति वा तत्राद्यपक्ष उदाहरणमुक्त्वावच्छेदपक्ष
उदाहरणमाह दृष्टपत्ते चेति। इदानीं जीवातिरिक्तेश्वरमीश्वराधीनतां च जीवानां तदनेकतां च सूत्रभाष्यश्रुतिस्मृतिभिः क्रमेण साधयति अपि चे
ति श्लोकं विवृणोति एवं च सतीति ... उत्तरः शारीरः कर्मकर्तृत्वव्यपदेशादिति एनमितः प्रेत्याभिसंभवितास्मीति प्राप्यप्राप्तव्यतया जीवपरमे
श्वरयोः कर्मकर्तृभावनिर्देशात् कैमीभूतमनोमयत्वादिगुणकं शांडिल्यविद्याप्रतिपाद्यः शारीरइत्सर्थः बद्धबद्धव्यवस्थायामपि श्रोतं लिंगमा
ह तद्योह इति देवानामध्येयो यः वीक्ष्ययाधिकारसंपन्नो सर्वेषामपि मुक्तिः ननु तार्किकाणामिव द्वैतवादैः कः स्वभावः केचिदिति दर्शितं तद्ब्रह्म स पसुबु
ध्यत प्रतिबुद्धवान् ननु स्वर्गादिश्विव भेदेन भोगमात्रं एवं मनुष्यादिष्वपि एकशतमितिमघवानिंद्रः प्रजापतौ प्रजापतिशाकाशे एकोनत्रिंशानं वर्षाणि
णि ब्रह्मविद्यार्थं ब्रह्मचर्यमुपवासउषितवान् सब्रह्मविद्यामिति सब्रह्मा ज्येष्टपुत्रायाथर्वायपञ्चाथर्वशाह्रोयमकांतः सर्वविद्याप्रतिष्ठां ब्रह्मविद्यांमा
हस्यतीति हासादिबहिरेव दृष्टव्यं अनेकजीववादस्तुपसंहरतितदतिउपाधयो विद्या इति वदृये न बंधमोक्षयोरेकानेक जीवपक्षद्वयेपि उन्नित्पिते

चि०री०४ मद्दर्प्यते उक्तं हि संप्रदायविद्भिः। न निरोधो न चोत्पत्तिर्न बंधो नैव साधकः न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थतेति केचिदाचार्यमंडनमिश्रवाच
२२ स्पतिमिश्रवृत्तावुक्तं विनः॥ ॥सत्सज्ज्ञानानंदानंतानंदैकरसब्रह्मात्मनोऽविद्यया तिरोधानं बंधः। विद्यया तन्निवृत्तिर्मोक्ष इत्युक्तं तत्र ब्रह्मण
विद्याश्रयत्वविषयत्वोपपादनेन जीवोयज्ञाविद्याविरोधानरूपबंधविधानिरूपिता तिरोधानेन हितस्वर्वैक्यविपर्यासो विवक्ष्यते संप्रति
65 विद्यानिवृत्तिलक्षणमोक्षतत्वं निरूपयाक्षेपसमाधानाभ्यां का पुनरित्यादिना तत्र किं सद्रूपिण्या विद्यानिवृत्तिः सद्रूपिणी वा सदसद्रूपि
णी वानिर्वचनीया पंचमप्रकारा वा। आत्ममात्रं वा तत्र सत्वपक्षे किमात्मातिरिक्ता नतिरिक्ता वा प्रथमे प्राह आत्मेति द्वितीये प्राह व्यतिरेके चेति
तत्रापि वक्तव्यं किमविद्यानिवृत्तेरात्ममात्रत्वं आत्मनो वाविद्यानिवृत्तिमात्रत्वं आद्ये प्राह आत्ममात्रत्व इति। आत्मनः सदातनत्वादित्यर्थः द्वितीयं
दूषयति तन्मात्रत्व इति। अविद्यानिवृत्तेस्तात्कालिकतया तन्मात्रात्मनोपि तात्कालिकत्वेन पूर्वमभावादज्ञानस्य सांख्यप्रकृतिवत्स्वातंत्र्यं स्यात्। आ
श्रयाभावात् आत्मनि सत्वादयश्च वह्वः कुप्येरन्निति भावः। असत्वपक्षं दूषयति नापीति। अत्रापि निरूपाख्यमसत्वेनाभिप्रेयते यथा शशविषा
णादि लिंगासोपाख्यं यथा घटाभावादि। आद्ये प्राह तुच्छत्व इति नाप्युपपत्तिरस्य संभवतीत्यर्थः द्वितीये प्राह भावेति तत्रापि किं निर्वाच्यमिति पक्षः रा०म०
यथा तार्किकप्रभृतीनां उतानिर्वाच्यमिति पक्षः यथा तार्किकप्रभृतीनां उतानिर्वाच्यमिति यथा भवन्मते शुक्तिरजतादि उभयथापि क्रमेण दूषण २२

माहतस्य विरोधः स्यादित्यादिना तत्कारणेति अविद्याकल्पितं हि अनिर्वाच्यं नाम तथा च कार्यमनिर्वाच्यमस्ति तौ तदुपादानेनापि स्यात् तथा इत्यर्थः नचैवमा
वाभावविलक्षणया निवृत्तिरभावरूपापि मुक्तिः सहमिथ्याह भावस्येति वा अनिवृत्तेरेवाभावत्वं अभावानिवृत्तेरेव च भावत्वं प्रसिद्धं तदुभयविलक्षणा वि
द्यानिवृत्तिः कथमभावः स्यात् एतच्च भावत्वेपि तुल्यमेतेन सदसद्रूपपक्षोपि प्रति। क्षिप्तः अविद्यायाः सदसद्रूपत्वेहि तन्निवृत्तेः सदसद्रूपता स्यात् अनि
र्वचनीयपक्षं दूषयति नापीति ननु अनिर्वचनीयत्वस्याविद्यात्कार्यत्वेन प्रतिबंधः निवृत्तिमत्वस्य तत्प्रयोजकत्वाभावनिवृत्तेर्निवृत्तिमत्वमस्ति अ
नवस्थानात् पुनरावृत्तित्वव्यापकोपाच्च अतो निवृत्तिमत्वं व्यावर्त्तमानं अविद्यातत्कार्यान्तरत्वमप्यतौ व्यावर्त्तयतीत्यानंदबोधाचार्योक्तं दूषयति नचा
विद्येतिसाधनव्यापकत्वादनुपाधिरित्यर्थः तत्र च बाधकं परिहरति नचेति निवृत्तेरिति पथ्याहि प्रध्वंसध्वंसवादिनामनवस्थानदोषा एवमित्यर्थः॥
अपुनरावृत्तित्वविरोधं परिहरति प्रध्वंसेति यथाह्युत्तरोत्तरध्वंसानामपि प्रथमं पदार्थविरोधितया न नष्टानुन्मज्जनं तथा अविद्यानिवृत्तिमा
त्राया अपि प्राचीनाविद्याविरोधित्वादेव तदनुन्मज्जनात् पुनरावृत्तिविरोध इत्यर्थः पंचमं पक्षं दूषयति नापीति अथ सद्विलक्षणत्वेपि किं मि
स निर्वाच्यता तत्राह सदसदिति अत्र यदुक्तं न्यायरत्नदीपावलीकारैः तद्दूषयितुमुद्भावयति ननु वेदान्तमित्यादिना नन्वियमपि ज्ञाननिवर्त्यैव
तत्राह नचेति स्यादेतदेवं विधाप्यविद्यानिवृत्तिर्दृश्यात्तावदभ्युपेयते आत्मव्यतिरिक्तत्वात् तथा च यदिनेयं ज्ञाननिवर्त्या तर्हि दृश्यत्वहेतुस्तत्रैवानैकां

ब्रि॰टी॰४ त्तिरु इति तत्राह ज्ञानानिवर्त्योपीति ज्ञाननिवर्त्यत्वमप्यतत्त्वज्ञानबाध्यत्वं चान्यदित्यभिमानः अपक्षधर्मं बाध्यत्वमस्येति तत्राह नेह नानेति तदेत
२३ द्दूषयति मैवमिति न हि विरोधस्तु दयमंतरेण विरोधिनिवृत्तिर्नामान्याद्दृश्यते युज्यते चेत्यर्थः अत्राचार्यसंमतिमप्याह ज्ञातोर्थ इति मंडनमिश्रसं
मतिमप्याह विद्यावच्चैवेति। नरस्तमयो विद्यास्तमयः किंच किंजासुप्राभाववियंव्याप्तिः यत्तज्ज्ञानजीतीयजन्यं तज्ज्ञातीयेन निवर्त्यत इति किंवासु
त्पाद्यावाद्यभिचारमाह ज्ञानजन्येति द्वितीय किंमुद्भाव्य तिनन्तुवव्येति अत्र व्यभिचारमाह मैवमीश्वरेति जगत्संहारेपि स्पष्टिवदीश्वरज्ञा
नं निमित्तमेवेति भावः अथानीश्वरज्ञानस्यैवेयं निपत्तिरिति ब्रूयात्तत्राहितत्रापि व्यभिचारमाहेत्याद्यघटं इति एकं हीदं ज्ञानमुत्पाद्य ना
शयिष्यामीति भावः नयच्चज्ञानत्वाज्ज्ञानवाप्रत्ययोर्भेदस्मादाय पक्षत्वे हेतोरनैकांतिकता वारणात् तदप्यसत् ज्ञाननिवर्त्यत्वातिरिक्तस्य ज्ञानबाध्यत्व
स्यानिरूपणादित्याह ज्ञानेसादिना अपसिद्धांतश्चेत्याह सविलासेविषष्टं पक्षं दूषयति नाप्यात्मैवेति आत्मनिसत्त्व्याहितश्चेत्याह आत्मन इति
ज्ञानस्यविशेषणत्वे इतिज्ञान आत्मेत्यत्र हनिरूपेतावत् ज्ञानं वक्तव्यं स्वरूपं ज्ञानं प्रतिकर्मत्वाभावात्ततश्च तत्व्यादि विशेषणांनिसंचतदाजन्यस्य कथं
निसत्वमिसास्तां तावत्संतानरूपेणचैवं निरवृत्तं तथापि तत्कारणांतःकरणादेवस्थानान्नसंसारतोविशेषः स्यादित्यर्थः॥ अथैतद्दोषभयादनित्यमे राम॰
वांगीक्रियते तर्ह्यपुनरावृत्तिलव्याको पइत्याह निसत्वे चेति नन्वज्ञानोपलक्षितात्मस्वरूपं अविद्यानिवृत्तिः तेन विशेषणपक्षप्रयुक्तदोषद्वयनिवृत्ति २३

67

68

रीति तत्राह न चज्ञानेति। अत्राप्युपलक्षितत्वधर्ममादाय दूषणद्वयं सुवचमित्यर्थः। पूर्वपक्षमुपसंहरति तस्मादिति॥ ॥आत्मैवाज्ञानाहानिरिति
पक्षं परिगृह्णन्नुपलक्षणमुपलक्ष्यं सिद्धान्ती समर्थयते निवृत्तिरिति ज्ञातत्वेनोपलक्षित आत्मा मोहस्याज्ञानस्य निवृत्तिः ननु उपलक्षणनाशे मुक्तेर
न्निसत्त्वं स्यादित्युक्तं तत्राहोपलक्षणेति यथा हि लोके लवनपचनादिक्रियानिवृत्तावपि देवदत्तः पाचको लावक इति प्रतीयते व्यवह्रियते च तथेहा
प्युपलक्षणज्ञातत्वनाशेपि मुक्तिः स्यादिति श्लोकार्थः। विवृणोति यथा लोक इति कलधौतं रजतं न तु न शुक्तिज्ञानं स्वजनितभ्रमनिवर्तकं येन ज्ञा
नाच्छुक्तिरेव तन्निवृत्तिः स्यादपि तु नेदं रजतमित्यन्योन्याभावज्ञानं तथा चज्ञानान्योन्याभाव एवाज्ञाननिवृत्तिरिति कथमधिष्ठानमात्रत्वं तन्नि
वृत्तेरिति तत्राह न च तत्रापीति किं तेन युक्तमित्यत आह अपरिज्ञात इति धर्मितया प्रतियोगितयाधिष्ठानज्ञानस्य पूर्वभावित्वान्नैव च तदारोपनिवृत्तेः
संसर्गमात्रारोपस्य बाधस्तादेव निरस्तत्वादन्योन्याभावज्ञानमपार्थमिति सिद्धानुवादस्यार्थः। नन्विदं रजताकारज्ञानमेवान्योन्याभावजनकं न शुक्तिज्ञा
नं अतो न कृतकरत्वमिति तत्राह हेदमिति तदविरोधात् भ्रांत्यविरोधात् भ्रांत्यविरोधान्नैतज्ज्ञानकत्वं न संभवतीति विशेषः इममेवं न्यायं प्रोक्तजनस्य न लेपियोज
यति तथा हापीति अनंतेति चानात्मविरूढाकारनिर्देशः अप्रसक्तरूपं हि वस्तु ततः परिछिन्नं भवतीति उत्तरार्धं विवृणोति न चाज्ञानेति येत्वमं पक्षं दो
ष बहुलतया मलीमसं मन्यमानाः प्राहुः अन्ये केचित्परिहारकातरतया परिहारमाचक्षते आत्मैवाज्ञानहानिरिति तेषामनुशयमुन्मूलयति एते

चि·टी·४
२४

नेतितद्विशदयति मुक्तोतिज्ञाततत्त्वविशिष्टपक्षपरिसागादेवतत्त्वयुक्तदोषशांतेः पंचमप्रकारे च प्रमाणाभावात्परिशेषस्य चैतेनैवोपपत्तेरनुत्थाना
दिति भावः ननु पुनरपि तत्रैव विभ्रमदर्शनादुत्पन्नज्ञानमसत्येवेति तत्राह पुनरुद्भवत इति नन्वेकमेवाज्ञानमिति तत्राह यावद्वतीति स्वं शावा
प्रदेशावावययावास्तवं तत्रावांगीक्रियते इति नतत्स्यैवोत्पन्नज्ञानमिति भावः नन्वत्रापि संसारांतरस्याज्ञानांतरसत्त्वात्पुनरुद्भवोस्त्विति तत्राहेह
वेति च्यात्तंकोभयं ननुभवत्वेवं संभावनाकिं पुनरत्रप्रमाणमिति तत्राह श्लोके नविगीतेति लोकिकविभ्रमविरहस्यापोतरत्नापरिहाराय
विगीतग्रहणं तत्रादृज्ञानहानिलाघवाभुक्त्यादिकमिति तदज्ञाननिवृत्तेरूपलक्षणं मुक्त्यादिमात्राज्ञाननिवृत्तिर्येथेसर्थेः एवमनुग्रा
हकतर्केस्थानीयमनुमानमुक्तानुग्राह्यमागममाहेवंचसतीति विज्ञानतः पुंसोयस्यामवस्थायां सर्वाणिभूतनिभवंतीति भूतानिका
र्येमात्रं च्यात्मैवाभूत्तत्रतस्यामवस्थायां कोमोहः कः शोक इति श्रुत्यर्थः यदि हि पंचमप्रकारस्यात्तदाकयमात्मैवाव्यतिरिक्तंसमस्तंयस्याभू
दितिनिर्दिश्येत तत्र प्रपंचस्याप्यरोपितत्वात्। वास्तवद्वैतेनात्ममात्रत्वेवक्लिमनिर्वचनीयाप्यपंचमप्रकारेति व्याहतं वक्तुमारब्धं एवं यत्रत्वस्येस्पा
द्वापिकदर्थिताउद्वेजिताः पंडिताइति यावत्तावदार्थमुपसंहरतितस्मादिति॥ ॥तदेवमविद्यानिवृत्तिमुक्तिरित्ययमर्थउपपादि एम०
तइदानींतत्रैवजीवन्मुक्तिलक्षणंवांतरविशेषमुपपादयति मुक्तस्त्विदृयेतथापिहिज्ञानंत्थविद्यानिवर्तकंतच्चतदुदयसमयमेववभवितुमर्हतिजा च्च २४

विघिलक्षणत्वेन कलांतरफलत्वाभावात् शुक्लपादिज्ञानेषु समसमयतादर्शनाच्चुत दिह यदि जीवतो ज्ञानमुत्पन्नमप्यविद्यान्तनि
वर्तयेत्। कावा लोकलांतरेतमिव तेने जीवत एव चक्षानो मुक्तिः इतरथा तउत्सादककरणाभावेनानुत्पत्तिप्रसंगात् यद्यपि मुक्तिरस्ति अस्ते
व जीवन्मुक्तिः अथ यदि न जीवन्मुक्तिः नास्त्येव मुक्तिरिति मुक्तिसिध्यर्थमेवायं विचारः विद्यासंप्रदायसिध्यर्थं च इतरथा हि तत्व
विदः सद्यः शरीरपाते शिष्याद्यप्रतिभासात् साक्षात्कृततत्त्वस्याचार्यस्यानुपदेष्टृत्वाद्विहीनसंप्रदायतया निर्मोक्ष एव पर्यवस्येत्। तदुक्तमा
चार्यैर्जीवन्मुक्तिप्रकरणे जीवन्मुक्तोक्तिर्मुक्तिर्यदीत्यादिना तत्र तावज्जीवन्मुक्तिमाक्षिपति नन्वित्यादिना अयमर्थः यद्या
त्मातिरिक्तस्यादविद्यानिवृत्तिः तदा देहपातानंतरमपि शरूपसभावनया स्याद्विदुषः शरीरादिप्रतिभासः यदा तु ज्ञानोपलक्षि
तात्मैवेति समर्थ्यते तदोपलक्ष्यस्यात्मनः सदातनत्वात् उपलक्षणात् तत्संबंधयोः सतोरूपलक्षिततानिष्पन्निवृत्तेर्वाविद्येति वचनीम
तथा च तदा कीदृिन स्थूलसूक्ष्मकलेवरयुगुलविलयाच्छिष्यादिप्रतिभासासंभवेद इति भावः। नन्वविद्यायाः किंस्विद्देशोस्ति ज्ञानेना
प्यविवसेः तन्निबंधनोयं शरीरादिप्रतिभास इति भावः तत्राह नचेति न हि समस्तविद्याविनोदि विज्ञानं सकदेशः समर्थमिति संभव
ती सर्थः समर्थसापि प्रतिबंधं शंकरे प्रारब्धेति यदि हि प्रारब्धकर्मणः स्थितिरेव स्यात्तदाकारणलेशपरिलक्षणं तदेव तु नास्ती

चि॰टी॰४ तिपरिहरतिमैवंकर्मणइतिससत्वप्रसंगादितिज्ञानबाध्यत्वंहिमिथ्यात्वमितिभावःननुकर्माणिक्षीयंतेसामान्यवचनमिदंअस्ति
२५ चापराश्रुतिःतस्यतावदेवचिरमितिकिंतुषोपिशरीरपातावधिंदर्शयंतीतथाचैतदनुरागेणाप्रारब्धकर्मव्यतिरिक्तकर्मविषयसाव्यव
स्थापनीयतितत्राहनचतस्यतावदेवेतिनेयंश्रुतिरपरोक्षज्ञानविषयायेनतदेकविषतयावांसंकोचयेदपितुपरोक्षज्ञानविषये
तिविरोधशंकैवनास्तीत्याहतस्माइतिस्मृतिबलाज्जीवन्मुक्तिंशंकयित्वादूषयतिनन्विसादिनास्मादेतद्भवतुपरोक्षज्ञानविषयो
ज्ञानिनइतिनिर्देशःतत्वदर्शिनइतिकथंतेषुसंगस्येतसाक्षात्कारोहिदर्शनंनामतस्मादेतदेवतत्वसाक्षात्कारिणःशरीरादि
प्रतिभासेप्रमाणमितितत्राहतत्वदर्शिनइतिचेतिअत्रहितत्वंद्रष्टुंशीलयस्येतिताच्छील्येणिनिप्रत्ययविधानात्तत्वदर्शनाभ्या
सशीलःप्रतीयतेनचापरोक्षज्ञानोदयेभ्यासावसरःतदर्थत्वादभ्यासस्यतस्मात्परोक्षज्ञानान्नाभ्यासशीलिनइहविवक्षिताः
अतएवतत्समभिव्याहृतज्ञानशब्दोपिपरोक्षज्ञानविषयइत्यर्थःननुपरोक्षज्ञानिनांतत्वदर्शित्वमनुपपन्नमपरोक्षेपरो
क्षज्ञानस्यायथार्थत्वयाविभ्रमत्वादितितत्राहनचापरोक्षइतिस्वात्मन्यात्मस्वरूपादिचस्वस्यतावदपरोक्षमितरेषांचतत्रानुमाना राम॰
छब्दाद्वापरोक्षज्ञानमुत्पद्यतेनचतद्भ्रांतमवितथार्थत्वादितरथाप्रतिवाधप्रमित्साकृपाप्रसादाद्यापातइतिभावः।एवमविद्याले २५

शास्थितिरनुपपन्नेत्युक्तं इदानीं एकत्वेऽपि विद्यायाऽनिरूप इत्याह कस्याश्रयमिति अनंगीकारादिति न निरवयवं न सावयवमित्यंगी
कारादिति अद्वयत्वात् नाद्वितयावयवानां अखंडत्वाच्चेत्समुच्चयः संदुन्मिश्रमतमुद्भावयति अस्तु तर्हीति दृष्टचरं चैतदित्याह वह्निह
न्तेति सांख्यसमतिमप्याह तिष्ठतीति तदेतद्दूषयति मैवमिति अनपायत्व इति अविद्यानन्तत्वात् निवृत्त्यर्थः नन्वविद्याजन्यत्वाभावे
पि मिथ्यात्वात् द्वैतव्याघात इति तत्राह मिथ्यात्व इति भावरूपेत्यभावरूपविलक्षणेत्यर्थः दृश्यत्वप्रध्वंसनिवृत्त्यर्थे दूषणांतरमाह नि
राश्रयस्येति नान्वकिमिति निराश्रयतया यावताऽविद्यासंस्कारस्याप्यविद्या अपश्रयभूतात्मैवाश्रयः संस्कारसंस्काराध्यापकयोरे
काश्रयत्वनियमादिति तत्राह नचात्मैवेति यथा निरवद्यस्यैवाविद्याश्रयत्वं न दुष्टं संस्काराश्रयत्वं किं न स्यादित्यत आह कार्येति अप
रिणामित्वादिति भावः ननु स्थितप्रज्ञलक्षणपरासु गीतासु दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृह इत्यादिना तत्त्वसाक्षात्कारिणो
पि दुःखाद्यनुषंगं दर्शयति इतरथा कांतं द्वेषं कुर्यात् तथा चतुर्दशाध्याये गुणातीतलक्षणे प्रकाशं च प्रवृत्तिं च मोहमेव च पांडव
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति तुल्यप्रियाप्रियः इत्यादिनापीत्यादिप्रतिभासो वर्तीयत इति तत्राह न चास्थितेति अनुवर्तनावद
नुष्ठापकत्वात् तद्वचनस्यैतेषां सं — दन परं शास्त्रं तथा च साधक एव एवंगुणको भवेदित्युपाधिके ऽर्थवादोऽच्यते अयमपरो पक्ष ज्ञाना

चि०टी०४
२६

दवोगेवकांचिदृत्कृष्टायवस्थामाप्नोत्र विवक्ष्यते सर्वथापि न जीवन्मुक्तलिंगत्वमित्यर्थः॥ ॥समाधवत्तेत्रेति राद्धांतहृदयं श्लोकाभ्यां
संगृह्णाति सुखप्रतिपत्त्यर्थं यते उक्तश्लोके न च फलितमाह लेशेति अपसिद्धांतशंकानिवृत्त्यै गुरुसंप्रदायप्रदर्शनपूर्वकमविद्यायाः आकाराना
काशे निवृत्तावाकारस्थितिं च दर्शयन् प्रथमार्धं विवृणोति एवं हि सादिना आरब्धपादः स्वगुरवः ज्ञाननिष्ठाकारः पादशब्दस्य पूज्यार्थं त
त्वमीतं च वेदांतप्रकरणन्यायसुधा अपरोक्षेति अपरोक्षप्रतिभासविषयभूतो यः आकारः पारमार्थिककलार्थक्रियासामर्थ्यरहितत याज्ञा
तस्यापि प्रपंचस्य शुक्तिरजतादिवत्तत्समर्पकस्तृतीय आकार इत्यर्थः॥ एतेषां चक्रमेणानिवर्तकं ज्ञानं शारीरगादर्शयति तत्रेत्यादिना तत्त्वसा
क्षात्कारेणेति अद्वैतात्मवस्तुसाक्षात्कारेणेत्यर्थः॥ ननु यदि साक्षात्कारे जातेपि जीवन्मुक्तस्य समाध्यवस्थायां तिरोहितोप्यदा चैतदुद्बो
धजनतः स्थितदाकारः केन नतर्हि तस्य निवृत्तिस्तत्राह प्रारब्धेति उक्तेर्थे श्रुतिमपि प्रमाणयति श्रुतिमपीति इंद्रः परमेश्वरः इदि परमैश्वर्ये इति
भौमसेनिस्मृतिः आदिशब्देन पूर्वग्रंथे विश्वमाया निवृत्तिरित्याख्या ग्रंथे तेमायां तु प्रकृतिं विद्यादावेकत्वेन प्रतिपादितमायामायाभिरि
त्यादिबहुत्वाभिधानं आकारभेद एव घटत इति भावः उत्तरार्धं व्याचष्टे न च लेशस्यापीत्यादिना इदानीं प्रारब्धकर्मणां ज्ञानापेक्ष्या प्राबल्यं उ राम०
पपादयत उक्तनीत्या च निवर्तने उपजीव्यस्य कोपपात्यो पपादयति तथा हीत्यादिना ननु यैरेव कृत्रिमैः स्वकर्मभिः ज्ञानार्थमेव देहस्तु साध २६

तत्राज्ञानमप्युत्साद्यतां किमिति कर्मान्तरारब्धशरीरोपजीवनं ज्ञानोत्सारकं नान्तयाचतदुत्सन्नौ देहनिवृत्तेर्न जीवन्मुक्तिरिति तत्राह अन्यथेति भव
तु कर्मान्तरारब्धशरीरे फलजनकत्वमेषां ततः किमिति तत्राह तथा चेति ननु भवतु ज्ञानोत्सादककर्मणां प्रारब्धकर्मापेक्षया दौर्बल्यं ज्ञानस्य
तु किमायातं तयेनोसन्नज्ञानमितराविशेषं तानि निवर्त्तयति तत्राह तथा च तैरिति उत्सद्यमानमेव तावत्संशेप्रतिबद्धशक्तिकं कारणावशा
दुत्सद्यतामिति भावः यत्तु प्रारब्धकर्मणां निपातादनतया स्थितिरेव नोपपद्यते कुतः प्रतिबंधकत्वमित्युक्तं तत्परिहरति न च कर्मणामिति नि
रूपादानत्वमसिद्धमित्यर्थः तत्प्रावितरेतराश्रयं शंकते नन्वेवमिति नात्र प्रारब्धकर्मभिरेवाविद्यालेशानुगतिः श्रुतिवशादपि शास्त्रव्याप्तिगलादि
ति परिहरति मैवं भूयश्चेति तस्याभिधानाद्योजनात्तत्त्वाभावाद्भूयश्चान्ते विश्वमायानिवृत्तिरिति श्वेताश्वतराणां मंत्रोपनिषदि श्रूयते अ
त्र च भूयो निवृत्तिरंते निवृत्तिर्विश्वमायानिवृत्तिरिति प्रतीयते तत्र विश्वग्रहणेनानेकमायाकारप्रतीतिः तेषां च क्रमेण निवृत्तिः भूयो निवृत्तिरि
ति पौनःपुन्यापरपर्यायक्रियासमभिव्याहाराभिधायिना भूयः शब्देनावगम्यते अंते निवृत्तिरित्यनेन च विदेहकैवल्यावस्थायां विलीयमानं अ
विद्याकारः प्रतीयते अंते विश्वमायानिवृत्तिरिति च सर्वमशेषेणायानिवृत्तिरिति च प्रतीयते तदेव प्रारब्धकर्मणां प्रमाणमार्गेणाविदेहनिर्वाणं अ
वस्थानाधिगमेन क्षीयंत इति सामान्यः श्रुतिसंकोचमर्हतीत्याह न एवेति ननु तस्य तावदेवेति परोक्षज्ञानविषयतया प्रत्याख्याते इति तत्राह तस्ये

चि॰टी॰४
२७

स्येति हेतुद्वयाभ्यर्थं द्योतयत इत्यर्थः ननु परोक्षज्ञानोत्पत्तावेवेदमाप्यर्थं प्रसक्तं श्रुतेः प्रवृत्तिर्हि मूर्खेष्वनुत्पद्यमानं परोक्षज्ञानमपि बुद्धिमत्सूत्पद्यमा
नं त्वप्राप्त्यर्थे हेतुरिति तत्राहाध्येति । अधीतवेदो विदितपदतदर्थसंगतिकः श्रवणेऽधिक्रियते न च तस्य परोक्षज्ञानोत्पत्तिरप्राप्त्यर्थे हेतुः प्रस्तुता
नुत्पत्तौ गर्हैव स्यादिति भावः स्तत्वे तेरन्यथासिद्धिः परिहरति न च ज्ञानिन इति किंच परोक्षे परोक्षज्ञानी विश्रान्त एव न च परस्तुस्वाद्यनुमानेव्य
भिचारः स्वापरोक्षे स्वपरोक्षविज्ञानस्यापि भ्रमत्वाद्व्यभिचारादित्याह स्वात्मनि चेतियतावकार्यविद्यानिवृत्त्यावाकारस्थितिर्न संभवतीत्युक्तेन
त्परिहरति न चाकारीति अनुवृत्तव्यावृत्तात्मकं हि समस्तवस्तु भाट्टैरभिप्रेयते यथा कुं कार्यरूपेणाभावात्ममेदः कारणात्मना हेमात्मनाऽ
यथाभेदः कुंडलो ह्यात्मनाभिन्न इति तत्र च यथा कटकरूपेण ह्याकारनाशेनाकारिनिवृत्तावप्याकारान्तरस्यानुवृत्तत्वान्निवृत्तिस्तत्वर्थः । यदि
चात्र तार्किको विप्रतिपद्येत तं प्रति सामान्यविशेषयोरत्यन्तभेदस्य समवायस्य चाङ्गीकारिरात्तीतत्वं तु स्यारणेन संभवतिरानेतव्यान्न चाकारा
तिरिक्तस्याकार्यपि निरूपणसहिष्णुः यन्निवृत्त्यासापि निवृत्तिरापद्येत ननु तथाप्यविद्यायाकोपमाकारः किमवयवः किं वास्तद्धर्मः कश्चिन्नो
भयथापि किं तद्ध्यविद्यैवावस्थान्तरमापन्ना विचित्रशक्तिर्ह्यविद्यातः प्रारब्धभोगकर्मनिमित्तकारणमात्ररूपेणाविद्याया यदवस्थानं स एवायं राम॰
तृतीय आकारः तेनाकार्यं च पूर्वोक्तप्रपंचापरोक्षः प्रतिभासस्तथाव यद्योगान्न चाद्रव्यस्यानारम्भस्य सावयवत्वविरोधः सकलद्रव्यपरिणामित्वादवयववत्वा २७

रंभप्रक्रिययोर्निरासाच्च न सावयवं निरवयवमिति तु तथा तथाऽनिरूपताभिप्रायेण उक्तं चेष्टसिद्धिकाराचार्यैः जीवन्मुक्तिप्रकरणे सांप्रतं
स्तुतं तनुसंबद्धनो नेष्टात्मबुद्धिक्रमोपपत्तेरिति स्थितप्रज्ञलक्षणगुणातीतलक्षणयोरुक्तोऽन्यथासिद्धिं परिहरति न च साधक एवेति। अनुस
न्त्रिमेव विशदयति न हि सर्वैंति अनुपपत्त्यंतरं दृष्ट्वा निवर्त्तते इति रोगादिवशान्निराहारस्य पुंसः अपशक्तत्वादेव विषया विनिवर्त्तंते रसवर्जं रसो
रागस्तद्वर्जं तस्मान्न निवर्त्तत इत्यर्थः अस्य तु स्थितप्रज्ञस्य परी सर्वोत्कृष्टं निरतिशयं स्वाभाविकं अनुदयनिधनमानंदरतिरोधा यत्कृप
रमानंदानुभावः कथमिवासाक्षात्कृततत्त्वस्य स्यादिति भावः साक्षात्कृततत्त्वस्यैव सकलकामनिवृत्तिरित्यत्र काठकश्रुतिमपि प्रमाण
यति यदेति यदा यस्यामवस्थायां अस्य पुरुषधौरेयस्य हृदि श्रिताः सर्वे कामाः प्रमुच्यंते हृदयबंधमोहिकामादयः कामः संकल्प इत्यादिश्रु
तेः तेन पूर्वमविद्यावशात्तादात्म्येनाध्यस्ताः ज्ञाते त्वात्मतत्त्वे प्रमुच्यंते हृदयात् एवं वस्तुत्त्वेन तत्त्वेन निर्लेपं प्रविलीयंते अथ तदा मर्त्यः सर्वमर
णधर्मवत्त्वयात्मानं मन्यमभिमानः पुरुषोऽमृतो भवति निरस्तसमस्तमरणादिविकारारोपः परमानंदो भवति तल्लोकांतरे कालांतरे वाने
साहात्ब्रह्मसमश्नुत इति यस्मिन्नशरीरे यदा च ज्ञानमुत्पन्नं तत्रैव तदैवेति एतावतास्य विद्यानिवृत्तिमात्रमुपलक्षयति तदनपायिष्टसासवका
मविनिर्मुक्तो न साधकः किं तु साक्षात्कृततत्त्व एव प्रतीयत इत्यर्थः वादार्थमुपसंहरति तदेवमिति श्रुतिस्तस्मान्नावद्देवचिरं ब्रह्मैव सन्ब्रह्माप्येति

विमुक्तश्चनिमुच्यतेसचक्षुरचक्षुरिवतद्यथाहिनिर्लेपनीसाद्यास्मृतिः स्थिरप्रज्ञगुणातीतलक्षणाद्याचक्षाणाइतिहारपुराणानिवृधि
ष्टवामदेवजनकजडभरतशुकशौनकुनिप्रभृतीनांसंजातसाक्षात्काराणामेवतत्रव्यवहाराभासप्रतिभासप्रतिपादकानिस्पष्टव्यानीसशेषमति
पुष्कलं॥ ॥स्वासंततोच्छेदरूपाक्षणिकचितिततितार्किकैकापिलैर्बौद्धैःप्रामुक्तिर्निरस्ताद्रढनयनिकरैःस्वीयपक्षेचमुक्तिः॥ ए
कानेकाचिदेकाश्रयविषयवतीजीवभावैकहेतुर्याविद्यातंन्निवृत्तिः परमसुखमयीजीवतश्चेतिचोक्ता॥१॥विरंमयामानसतीर्थसे
वयाविरंचविद्यागिरिपारसेवया।चिरंचदिव्यामलतीर्थसेवयालब्धानि।नदिव्यानिनवोषधानिते॥२॥उदयतर्कद्युतितिग्मतल
मदीपिकालोकनतत्सराणांउच्चैरविद्यातिमिरापहन्त्राक्षणां।नेत्रांजनेचाकुरुतेह्टीका॥३॥श्रुतमनुमननंमेयुक्तितस्तत्वविन्त्यैविहि
तमितिमयायंयत्नलेशोप्यधापिनपुनरपरहेतुःकल्पनीयात्रकल्पाद्विविधरुचिजनेभ्यःख्यातिकामःसचेताः॥४॥निर्मोक्षंनिन्नबो
धंनिरवधिविपुलानंदमुत्तमानंदंत्वंकुर्वद्धिप्सुविहर्षंहरदनचरतंदिव्यमायाःसहायं॥प्रत्यक्षतत्वंविदित्वाक्षरवदसकवद्यगुणैर्वैदवा
क्याद्वस्तद्वांतोविमुक्तोभवतिपरपदंतत्प्रपद्यतेमुरारेः॥५॥जयतुसगजव — ध्वातुलोकत्रयोयःक्ररध्वजनिजदंतःश्वेलतेविघ्नकंदः॥
भुवनविवरवर्तीन्यक्कृतमातंगहीलासुरसुररिपुहेतोःसंदिहानःसंदेवः॥६॥अखिलतत्वविमथितभ्रमपरावोधतमोधोरधरीक्षितोयस्मिन्शमसंप्रका

चि॰टी॰४
२९

शशाद्वस्तस्य स्त्वं वैमि परमगुरुं ॥७॥ यत्संगतः सकलसंगविमुक्तिरासीद्यत्संस्मृतेर्विषयविस्मृतिरेव जाता यत्पादयांबुमिलनाममा
सीन्मस्तकमंकमिपि नौमि गुरुं प्रकाशं ॥८॥ विबुधगणशिरोभिः संगतो त्रंसिनोयः स्वपदकमललक्ष्मीर्लक्ष्यते जोनुभावं महित
परमहंसैः सादरं सेव्यविद्याविमलसलिलपूरं स्नान संनौमि तीर्थं ॥९॥ ॥इति श्रीमत्परमहंसपरिव्राजकाचार्यस्वप्रकाशपू
ज्यया शिष्यस्य प्रत्यक्स्वरूपभगवतः कृतौ स्वप्रदीपिकाटीकायां भावदीपिकायां चतुर्थः परिच्छेदः समाप्तिमगमत्॥ ॥
॥ ॥ ॥छ॥ ॥छ॥ ॥

राम॰
२९

78

11/10

प्रसकहदीपिकाव्याख्यासमाप्ता

937